ॐ ह्रीँ श्रीँ क्लीँ सर्व्वपूज्ये देवि मङ्गलचण्डिके ।
हुँ हुँ फट् स्वाहेत्येवञ्चाप्येकविंशाक्षरो मनुः ॥
पूज्यः कल्पतरुश्चैव भक्तानां सर्व्वकामदः ।
दशलक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम् ।
मन्त्रसिद्धिर्भवेद्यस्य स विष्णुः सर्व्वकामदः ॥
ध्यानञ्च श्रूयतां ब्रह्मन् ! वेदोक्तं सर्व्वसम्मतम् ॥
देवीं षोड़शवर्षीयां शश्वत्सुस्थिरयौवनाम् ।
सर्व्वरूपगुणाढ्याञ्च कोमलाङ्गीं मनोहराम् ॥
श्वेतचम्पकवर्णाभां चन्द्रकोटिसमप्रभाम् ।
वह्निशुद्धांशुकाधानां रत्नभूषणभूषिताम् ॥
बिभ्रतीं कवरीभारं मल्लिकामाल्यभूषितम् ।
बिम्बोष्ठीं सुदतीं शुद्धां शश्वत्पद्मनिभाननाम् ॥
ईषद्धास्यप्रसन्नास्यां सुनीलोत्पललोचनाम् ।
जगद्धात्रीञ्च दात्रीञ्च सर्व्वेभ्यः सर्व्वसम्पदाम् ।
संसारसागरे घोरे पोतरूपां वरां भजे ॥
देव्याश्च ध्यानमित्येवं स्तवनं श्रूयतां मुने ! ।
प्रयातः सङ्कटग्रस्तो येन तुष्टाव शङ्करः ॥
श्रीशङ्कर उवाच ।
रक्ष रक्ष जगन्मातर्देवि मङ्गलचण्डिके ! ।
हारिके विपदां राशेः हर्षमङ्गलदायिके ! ॥
हर्षमङ्गलदक्षे च हर्षमङ्गलचण्डिके ! ।
शुभे मङ्गलदक्षे च शुभे मङ्गलचण्डिके ! ॥
मङ्गले मङ्गलार्हे च सर्व्वमङ्गलमङ्गले ! ।
सतां मङ्गलदे देवि ! सर्व्वेषां मङ्गलालये ! ॥
पूज्ये ! मङ्गलवारे च मङ्गलाभीष्टदेवते ! ।
पूज्ये मङ्गलभूपस्य मनुवंशस्य सन्ततम् ॥
मङ्गलाधिष्ठातृदेवि ! मङ्गलानाञ्च मङ्गले ! ।
संसारमङ्गलाधारे मोक्षमङ्गलदायिनि ! ॥
सारे च मङ्गलाधारे पारे च सर्व्वकर्म्मणाम् ।
प्रतिमङ्गलवारे च पूज्ये च मङ्गलप्रदे ! ॥
स्तोत्रेणानेन शम्भुश्च स्तुत्वा मङ्गलचण्डिकाम् ।
प्रतिमङ्गलवारे च पूजां कृत्वा गतः शिवः ॥
देव्याश्च मङ्गलं स्तोत्रं यः शृणोति समाहितः ।
तन्मङ्गलं भवेत् शश्वन्न भवेत्तदमङ्गलम् ॥
प्रथमे पूजिता देवी शिवेन सर्व्वमङ्गला ।
द्वितीये पूजिता देवी मङ्गलेन ग्रहेण च ॥
तृतीये पूजिता भद्रा मङ्गलेन नृपेण च ।
चतुर्थे मङ्गले वारे सुन्दरीभिश्च पूजिता ॥
मङ्गले मङ्गलाकाङ्क्षैर्नरैर्मङ्गलचण्डिका ।
पूजिता प्रतिविश्वेषु विश्वेशपूजिता सदा ॥
ततः सर्व्वत्र संपूज्या सा बभूव सुरेश्वरी ।
देवादिभिश्च मुनिभिर्मनुभिर्मानवैर्मुने ! ॥
वर्द्धते तत्पुत्त्रपौत्त्रो मङ्गलञ्च दिने दिने ॥”
इति ब्रह्मवैवर्त्ते महापुराणे प्रकृतिखण्डे नारायणनारदीये मङ्गलचण्डिकोपाख्यानं तत्स्तोत्रकथनं नाम ४१ अध्यायः ॥

मङ्गलच्छायः, पुं, (मङ्गला मङ्गलजनिका छाया यस्य ।) प्लक्षवृक्षः । इति राजनिर्घण्टः ॥

मङ्गलनीराजनं, क्ली, (मङ्गलं मङ्गलकरं मङ्गलाय वा नीराजनम् ।) प्रातःसूर्य्यकर्त्तव्य भगवदारात्रिकम् । मङ्गल आरती इति भाषा ॥ यथा,—
“पठित्वाथ शिवान् श्लोकान् महावादित्र-
निःस्वनैः ।
प्रभोर्नीराजनं कुर्य्यान्मङ्गलाख्यं जगद्धितम् ॥
नीराजनन्त्विदं सर्व्वैः कर्त्तव्यं शुचिविग्रहैः ।
परमश्रद्धयोत्थाय द्रष्टव्यञ्च सदा नरैः ॥
स्त्रीणां पुंसाञ्च सर्व्वेषामेतत् सर्व्वेष्टपूरकम् ।
समस्तदैन्यदारिद्र्यदुरितादुपशान्तिकृत् ॥”
इति श्रीहरिभक्तिविलासे ३ विलासः ॥

मङ्गलपाठकः, पुं, (पठतीति । पठ+ण्वुल् । मङ्गलस्य पाठकः ।) वन्दी । इति हेमचन्द्रः । ७ । ६४ ॥ (यथा, वेणीसंहारनाटके । १, अङ्के
‘आः पाप ! दुरात्मन् ! वृथामङ्गलपाठक ! ।’

मङ्गलप्रदा, स्त्री, (मङ्गलं प्रददातीति । प्र+दा+“आतश्चोपसर्गे ।” ३ । १ । १३६ । इति कः । टाप् ।) हरिद्रा । इति केचित् ॥ मङ्गलदातरि त्रि ॥

मङ्गला, स्त्री, (मङ्गलमस्या अस्तीति । मङ्गल+ अर्श आद्यच् । टाप् ।) पार्व्वती । शुक्लदूर्व्वा । पतिव्रता । इति शब्दरत्नावली ॥ करञ्जभेदः । इति शब्दचन्द्रिका ॥ दुरालभामाल्लविशेषः । इति हेमचन्द्रः ॥ हरिद्रा । नीलदूर्व्वा । इति राजनिर्घण्टः ॥

मङ्गलागुरु, क्ली, (मङ्गलञ्च तत् अगुरु चेति । नित्यकर्म्मधारयः ।) अगुरुचतुष्टयान्तर्गतागुरुविशेषः । यथा, राजनिर्घण्टः ।
“मङ्गल्या मल्लिकागन्धा मङ्गलागुरुवाचकाः ।
मङ्गल्या गुरुशिंशिपा गन्धाढ्या योगवाहिकाः ॥”

मङ्गल्यं, क्ली, (मङ्गलाय साधु इति । मङ्गल+ “तत्र साधुः ।” ४ । ४ । ९८ । इति यत् ।) दधि । इति मेदिनी । ये, १०१ ॥ चन्दनम् । मङ्गल्यागुरु । स्वर्णम् । सिन्दूरम् । इति राजनिर्घण्टः ॥

मङ्गल्यं, त्रि, (मङ्गलाय साधु । मङ्गल+यत् ।) शिवकरम् । इति मेदिनी । ये, १०१ ॥ (यथा, उत्तरचरिते । ७ म अङ्के ।
“पाप्मभ्यश्च पुनाति वर्द्धयति च श्रेयांसि येयं
कथा ।
मङ्गल्या च मनोहरा च जगतो मातेव
गङ्गेव च ॥”
यथाच, महाभारते । १ । १ । २४ ।
मङ्गल्यं मङ्गलं विष्णुं वरेण्यमनघं शुचिम् ।
नमस्कृत्य हृषीकेशं चराचरगुरुं हरिम् ॥”)
रुचिरम् । इति हेमचन्द्रः ॥ साधुः । इति धरणिः ॥

मङ्गल्यः, पुं, (मङ्गलाय साधुः । मङ्गल+“तत्र साधुः ।” ४ । ४ । ९८ । इति यत् ।) त्रायमाणा । अश्वत्थः । विल्वः । मसूरकः । इति मेदिनी । ये, १०० ॥ जीवकः । नारिकेलः । कपित्थः । रीठाकरञ्जः । इति राजनिर्घण्टः ॥ (जीव इति ख्यातः शाकविशेषः । तत्पर्य्यायो यथा,—
“जीवन्ती जीवनी जीवा जीवनं शा मधुस्रवा ।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मङ्गल्यकः, पुं. (मङ्गल्य+संज्ञायां कन् । यद्वा मङ्गलस्य मङ्गलग्रहस्य प्रियः इति यत् । ततः स्वार्थे कन् ।) मसूरः । इत्यमरः । २ । ९ । १७ ॥ (तथास्य पर्य्यायः ।
“मङ्गल्यको मसूरः स्यान्मङ्गल्या च मसूरिका ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मङ्गल्यकुसुमा, स्त्री, (मङ्गल्यानि कुसुमानि यस्याः ।) शङ्खपुष्पी । इति भावप्रकाशः ॥

मङ्गल्यनामधेया, स्त्री, (मङ्गलं मङ्गलजनकं नामधेयं यस्याः ।) जीवन्ती । इति जटाधरः ॥

मङ्गल्या, स्त्री, (मङ्गलाय साधुरिति यत् । टाप् ।) मल्लिकागन्धयुक्तागुरु । इत्यमरः । २।६।१२७ ॥ शमी । अधःपुष्पी । मिषी । शुक्लवचा । रोचना । इति मेदिनी । ये, १०० ॥ प्रियङ्गुः । शङ्खपुष्पी । इति हेमचन्द्रः ॥ माषपर्णी । जीवन्ती । ऋद्धिः । वचा । हरिद्रा । चीड़ा । इति राजनिर्घण्टः ॥ दूर्व्वा । इति रत्नमाला ॥ दुर्गा । यथा,—
“शोभनानि च श्रेष्ठानि या देवी ददते हरे ।
भक्तानामार्त्तिहरणी मङ्गल्या तेन सा स्मृता ॥”
इति देवीपुराणे ४४ अध्यायः ॥
(वचार्थे पर्य्यायो यथा,—
“तीक्ष्णोग्रगन्धा जटिला मङ्गल्या विजया वचा ।
षड्ग्रन्थोग्रा च रक्षोघ्नी सिता हैमवती तु सा ॥”
मिश्यर्थे यथा,— [मिसी ॥”
“अवाक्पुष्पी च कृचा स्यान्मङ्गल्या मधुरा
हेमपुष्पी । तत्पर्य्यायो यथा,—
“अवाक्पुष्पी त्वधःपुष्पी मङ्गल्यामरपुष्पिका ॥”
इति च वैद्यकरत्नमालायाम् ॥
रोचनार्थे पर्य्यायो यथा,—
“गोरोचना तु मङ्गल्या वन्द्या गौरी च रोचना ।”
शम्यर्थे पर्य्यायो यथा,—
“शमी शक्तुफला तुङ्गा केशहन्त्री फला शिवा ।
मङ्गल्या च तथा लक्ष्मीः शमीरः शाखिका
स्मृता ॥”
मसूरः । तत्पर्य्यायो यथा,—
“मङ्गल्यको मसूरः स्यान्मङ्गल्या च मसूरिका ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मङ्गिनी, स्त्री, (मङ्गो नौशिरस्तदस्या अस्तीति इनिः ङीप् च ।) नौका । इति हेमचन्द्रः ॥

मङ्क्षणं, क्ली, (मङ्क्ष्यतेऽनेनेति । मङ्क्ष+ल्युट् ।) अङ्गत्राणम् । इति हारावली । १९८ ॥

मङ्क्षु, व, मज्जतीति । मस्ज्+बहुलवचनात् सुः ।
“मस्जिनशोर्झलि ।” ७ । १ । ६० । इति नुम् । “स्कोः संयोगाद्योरन्ते च ।” ८ । २ । २९ । इति सलोपः ।) द्रुतम् । इत्यमरः । ३ । ४ । २ । (यथा, माघे । ५ । ३७ ।
“यद्दन्तिनः कटकटाहतटान्मिमङ्क्षो-
र्मङ्क्षूदपाति परितः पटलैरलीनाम् ॥”)
भृशार्थम् । इति मेदिनी अव्यये । षे, ७९ ॥